# Vedagarbham Shri Bhuvaneshvari Stotram or Shri Bhuvaneshvari MahastotraM

# વેદગર્ભં શ્રીભુવનેશ્વરીસ્તોત્રમ્ અથવા શ્રીભુવનેશ્વરીમહાસ્તોત્રમ્

## Document Information

Text title : bhuvaneshvarIstotram 2 vedagarbhaM

File name : bhuvaneshvarIstotramvedagarbhaM.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Author : shrIpRithvIdharAchArya

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425, shrIbhuvaneshvarI varivasyA

Latest update : July 28, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 8, 2021

*sanskritdocuments.org*

# Vedagarbham Shri Bhuvaneshvari Stotram or Shri Bhuvaneshvari MahastotraM

# વેદગર્ભં શ્રીભુવનેશ્વરીસ્તોત્રમ્ અથવા શ્રીભુવનેશ્વરીમહાસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

ધ્યાનમ્ -

ૐ ચઞ્ચન્મૌક્તિકહેમમણ્ડનયુતા માતાઽતિરક્તામ્બરા
તન્વઙ્ગી નયનત્રયાતિરુચિરા બાલાર્કવદ્ભાસુરા ।
યા દિવ્યાઙ્કુશપાશભૂષિતકરા દેવી સદા ભીતિહા
ચિત્તસ્થા ભુવનેશ્વરી ભવતુ નઃ સેયં મુદઃ સર્વદા ॥

કર્ણસ્વર્ણવિલોલકુડલધરામાપીનવક્ષોરુહાં
મુક્તાહારવિભૂષણાં પરિલસદ્ધમ્મિલ્લસન્મલ્લિકામ્ ।
લીલાલોલિતલોચનાં શશિમુખીમાબદ્ધકાઞ્ચીસ્રજં
દીવ્યન્તીં ભુવનેશ્વરીમનુદિનં વન્દામહે માતરમ્ ॥

ઐન્દવ્યા કલયાવતંસિતશિરોવિસ્તારિનાદાત્મકં
તદ્રૂપં જનનિ સ્મરામિ પરમં સન્માત્રમેકં તવ ।
યત્રોદેતિ પરાભિધા ભગવતી ભાસાં હિ તાસાં પદં
પશ્યન્તી તનુમધ્યમા વિહરતિ સ્વૈરં ચ સા વૈખરી ॥ ૧॥

આદિક્ષાન્તવિલાસલાલસતયા તાસાં તુરીયા તુ યા
ક્રોડીકૃત્ય જગત્ત્રયં વિજયતે વેદાદિવિદ્યામયી ।
તાં વાચં મયિ સમ્પ્રસાદય સુધાકલ્લોલકોલાહલ-
ક્રીડાકર્ણનવર્ણનીયકવિતાસામ્રાજ્યસિદ્ધિપ્રદામ્ ॥ ૨॥

કલ્પાદૌ કમલાસનોઽપિ કલયા વિદ્ધઃ કયાચિત્કિલ
ત્વાં ધ્યાત્વાઙ્કુરયાઞ્ચકાર ચતુરો વેદાંશ્ચ વિદ્યાશ્ચ તાઃ ।
તન્માતર્લલિતે પ્રસીદ સરલં સારસ્વતં દેહિ મે
યસ્યામોદમુદીરયન્તિ પુલકૈરન્તર્ગતા દેવતાઃ ॥ ૩॥

માતર્દેહભૃતામહો ધૃતિમયી નાદૈકરેખામયી
સા ત્વં પ્રાણમયી હુતાશનમયી બિન્દુપ્રતિષ્ઠામયી ।
તેન ત્વાં ભુવનેશ્વરીં વિજયિનીં ધ્યાયામિ જાયાં વિભો-
સ્ત્વત્કારુણ્યવિકાશિપુણ્યમતયઃ ખેલન્તુ મે સૂક્તયઃ ॥ ૪॥

ત્વામશ્વત્થદલાનુકારમધુરામાધારબદ્ધોદરાં
સંસેવે ભુવનેશ્વરીમનુદિનં વાગ્દેવતામેવ તામ્ ।
તન્મે શારદકૌમુદીપરિચિયોદઞ્ચત્સુધાસાગર-
સ્વૈરોજ્જાગરવીચિવિભ્રમજિતો દીવ્યન્તુ દિવ્યા ગિરઃ ॥ ૫॥

લેખપ્રસ્તુતવેદ્યવસ્તુસુરભિશ્રીપુસ્તકોત્તંસિતો
માતઃ સ્વસ્તિકૃદસ્તુ મે તવ કરો વામોઽભિરામઃ શ્રિયા ।
સદ્યો વિદ્રુમકન્દલીસરલતાસન્દોહસાન્દ્રાઙ્ગુલિર્મુદ્રાં
બોધમયીં દધત્તદપરોઽપ્યાસ્તામપાસ્તભ્રમઃ ॥ ૬॥

માતઃ પાતકજાલમૂલદલનક્રીડાકઠોરા દૃશઃ
કારુણ્યામૃતકોમલાસ્તવ મયિ સ્ફૂર્જન્તુ સિદ્ધ્યર્જિતાઃ ।
આભિઃ સ્વાભિમતપ્રબન્ધલહરીસાકૂતકૌતૂહલાઽ-
ઽચાન્તસ્વાન્તચતુર્મુખોચિતગુણોદ્ગારાં કરિષ્યે ગિરમ્ ॥ ૭॥

ત્વામાધારચતુર્દલામ્બુજગતાં વાગ્બીજગર્ભે યજે
પ્રત્યાવૃત્તિભિરાદિભિઃ કુસુમિતાં માયાલતામુન્નતામ્ ।
ચૂડામૂલપવિત્રપત્રકમલપ્રેઙ્ખોલખેલત્સુધા-
કલ્લોલાસુ કુચક્રચઙ્ક્રમચમત્કારૈકલોકોત્તરામ્ ॥ ૮॥

સોઽહં ત્વત્કરુણાકટાક્ષશરણઃ પઞ્ચાધ્વસઞ્ચારતઃ
પ્રત્યાહૃત્ય મનો વસામિ રસનાલિઙ્ગં મમાલિઙ્ગતુ ।
શ્રીસર્વજ્ઞવિભૂષણીકૃતકલાનિઃસ્યન્દ્રમાનામૃત-
સ્વચ્છન્દસ્ફટિકાદ્રિસાન્દ્રિતપયઃ શોભાવતી ભારતી ॥ ૯॥

માતર્માતૃકયા વિદર્ભિતમિદં ગર્ભીકૃતાનાહત-
સ્વચ્છન્દ્રધ્વનિપેયમધ્વનિરતં ચન્દ્રાર્કનિદ્રાગિરૌ ।
સંસેવે વિપરીતરીતિરચનોચ્ચારાદકારાવધિ-
સ્વાધીનામૃતસિન્ધુબન્ધુરમહો માયામયં તે મહઃ ॥ ૧૦॥

તસ્માન્નન્દનચારુચન્દનતરુચ્છાયાસુ પુષ્પાસવ-
સ્વૈરાસ્વાદનમોદમાનમનસામુદ્દામવામભ્રુવામ્ ।

વીણાસઙ્ગિતરઙ્ગિતસ્વરચમત્કારોઽપિ સારોજ્ઝિતો
યેન સ્યાદિહ દેહિ મે તદભિતઃ સઞ્ચારિ સારસ્વતમ્ ॥ ૧૧॥

આધારે હૃદયે શિખાપરિસરે સન્ધાય મેધામયીં
ત્રેધાબીજતનૂમનૂનકરુણાપીયૂષકલ્લોલિનીમ્ ।
ત્વાં માતર્જપતો નિરઙ્કુશનિજાદ્વૈતામૃતાસ્વાદન-
પ્રજ્ઞામ્ભશ્ચુલુકૈઃ સ્ફુરન્તુ પુલકૈરઙ્ગાનિ તુઙ્ગાનિ મે ॥ ૧૨॥

વાણીબીજમિદં જપામિ પરમં તત્કામરાજાભિધં
માતઃ સાન્તપરં વિસર્ગસહિતૌકારોત્તરં તેન મે ।
દીર્ઘાન્દોલિતમૌલિકીલિતમણિપ્રારબ્ધનીરાજનૈર્ધીરૈઃ
પીતરસા નિરન્તરમસૌ વાગ્જૃભતામદ્ભુતા ॥ ૧૩॥

ચૂડાચન્દ્રકલાનિરતરગલત્પીયૂષબિન્દુશ્રિયા
સન્દેહોચિતમક્ષસૂત્રવલયં યા બિભ્રતી નિર્ભરમ્ ।
અન્તર્મન્ત્રમયં સ્વમેવ જપસિ પ્રત્યક્ષવૃત્ત્યક્ષરં
સા ત્વં દક્ષિણપાણિનામ્બ વિતર શ્રેયાંસિ ભૂયાંસિ મે ॥ ૧૪॥

બદ્ધ્વા સ્વસ્તિકમાસનં સિતરુચિચ્છેદાવદાતચ્છવિ-
શ્રેણિશ્રીસુભગં ભવિષ્ણુસતતવ્યાજૃમ્ભમાણેઽમ્બુજે ।
દીવ્યન્તીમધિવામજાનુ રુચિરન્યસ્તેન હસ્તેન તાં
નિત્યં પુસ્તકધારણપ્રણયિનીં સેવે ગિરામીશ્વરીમ્ ॥ ૧૫॥

તન્મે વિશ્વપથીનપીનવિલસન્નિઃસીમસારસ્વત-
સ્રોતોવીચિવિચિત્રભઙ્ગિસુભગા વિભ્રાજતાં ભારતી ।
યામાકર્ણ્ય વિઘૂર્ણમાનમનસઃ પ્રેઙ્ખોલિતૈર્મીલિભિ-
ર્મીલદ્ભિર્નયનાઞ્ચલૈઃ સુમનસો નિન્દેયુરિન્દોઃ કલામ્ ॥ ૧૬॥

આદૌ વાગ્ભવમિન્દુબિન્દુમધુરં ઝાન્તે ચ કામાત્મકં
યોગાન્તે કષયોસ્તૃતીયમિતિ તે બીજત્રયં ધ્યાયતામ્ ।
સાર્ધં માતૃકયા વિલોમવિષમં સન્ધાય બન્ધચ્છિદા
વાચાન્તર્ગતયા મહેશ્વરિ મયા માત્રાશતં જપ્યતે ॥ ૧૭॥

તત્સારસ્વતસાર્વભૌમપદવી સદ્યો મમ દ્યોતતાં
યત્રાજ્ઞાવિહિતૈર્મહાકવિશતૈઃ સ્ફીતાં ગિરં ચુમ્બતામ્ ।
ચૈત્રોન્મીલિતકેલિકોકિલકુહૂકારાવતારઞ્ચિત-
શ્લાઘાસઞ્ચિતપઞ્ચમશ્રુતિસમાહારોઽપિ ભારોપમઃ ॥ ૧૮॥

વાગ્બીજં ભુવનેશ્વરીં વદ વદેત્યુચ્ચાર્ય વાગ્વાદિનિ
સ્વાહાવર્ણવિશીર્ણપાતકભરાં ધ્યાયામિ નિત્યાં ગિરમ્ ।
વીણાપુસ્તકમક્ષસૂત્રવલયં વ્યાજૃમ્ભમમ્ભોરુહં
બિભ્રાણામરુણાશુભિઃ કરતલૈરાવિર્ભવદ્વિભ્રમામ્ ॥ ૧૯॥

તં માતઃ કૃપયા તરઙ્ગયતરાં વિદ્યાધિપત્યં મયિ
જ્યોત્સ્નાસૌરભચૌરકીર્તિકવિતાસેવ્યૈકસિંહાસનમ્ ।
કાલાજ્ઞાદિશિવાવસાનભવનપ્રાગ્ભારકુક્ષિમ્ભરિ
પ્રજ્ઞામ્ભઃપરિપાકપીવરપરાનન્દપ્રતિષ્ઠાસ્પદમ્ ॥ ૨૦॥

લેખાભિસ્તુહિનદ્યુતેરિવ કૃતં વાગ્બીજમુચ્ચૈઃ સ્ફુર-
ત્તારાકારકરાલબિન્દુ પરિતો માયાત્રિધાઽઽવેષ્ટિતમ્ ।
પૂર્ણેન્દોરુદરે તદેતદખિલં પીયૂષગૌરાક્ષરં
સ્રોતઃસમ્ભ્રમસમ્ભૃતં સ્મરતિ યો જિહ્વાઞ્ચલે નિશ્ચલઃ ॥ ૨૧॥

તસ્ય ત્વત્કરુણાકટાક્ષકણિકાસઙ્ક્રાન્તિમાત્રાદપિ
સ્વાન્તે શાન્તિમુપૈતિ દીર્ઘજડતા જાગ્રદ્વિકારાગ્રણીઃ ।
તસ્માદાશુ જગત્ત્રયાદ્ભુતરસાદ્વૈતપ્રતીતિપ્રદં
સૌરભ્યં પરમભ્યુદેતિ વ વનામ્ભોજે ગિરાં વિભ્રમૈઃ ॥ ૨૨॥

આદ્યો મૌલિરથાપરો મુખમિઈ નેત્રે ચ કર્ણાવુઊ
નાસાવંશપુટે ઋૠ તદનુજૌ વર્ણૌ કપોલદ્વયમ્ ।
દન્તાશ્ચોર્ધ્વમધસ્તથોષ્ઠયુગલં સન્ધ્યક્ષરાણિ ક્રમા-
જ્જિહ્વામૂલમુદગ્રબિન્દુરપિ ચ ગ્રીવા વિસર્ગી સ્વરઃ ॥ ૨૩॥

કાદિર્દક્ષિણતો ભુજસ્તદપરો વર્ગશ્ચ વામો ભુજ-
ષ્ટાદિસ્તાદિરનુક્રમેણ ચરણૌ કુક્ષિદ્વયં તે પફૌ ।
વંશઃ પૃષ્ઠભવોઽથ નાભિહૃદયે બાદિત્રયં ધાતવો
યાદ્યાઃ સપ્ત સમીરણશ્ચ સપરઃ ક્ષઃ ક્રોધ ઇત્યમ્બિકે ॥ ૨૪॥

એવં વર્ણમયં વપુસ્તવ શિવે લોકત્રયવ્યાપકં
યોઽહમ્ભાવનયા ભજત્યવયવેઽપ્યારોપિતૈરક્ષરૈઃ ।
મૂર્તીભૂય દિનાવસાનકમલાકારૈઃ શિરઃશાયિભિસ્તં
વિદ્યાઃ સમુપાસતે કરતલૈર્દૃષ્ટિપ્રસાદોત્સુકાઃ ॥ ૨૫॥

યે જાનન્તિ યજન્તિ સન્તતમભિધ્યાયન્તિ ગાયન્તિ વા

તેષામાસ્યમુપાસ્યતે મૃદુપદન્યાસૈર્વિલાસૈર્ગિરામ્ ।
કિઞ્ચ ક્રીડતિ ભૂર્ભુવઃસ્વરભિતઃ શ્રીચન્દનસ્યન્દિની
કીર્તિઃ કાર્તિકરાત્રિકૈરવસમા સૌભાગ્યશોભાકરી ॥ ૨૬॥

માયાબીજવિદર્ભિતં પુનરિદં શ્રીકૂર્મચક્રોદિતં
દીપામ્નાયવિદો જપન્તિ ખલુ યે તેષાં નરેન્દ્રાઃ સદા ।
સેવન્તે ચરણૌ કિરીટવલભીવિશ્રાન્તરત્નાઙ્કુર-
જ્યોત્સ્નામેદુરમેદિનીતલરજોમિશ્રાઙ્ગરાગશ્રિયઃ ॥ ૨૭॥

શ્રીબીજં સકલાક્ષરાદિષુ પુનઃ ક્રોધાક્ષરાન્તે ભવેદેવં
યો ભજતેઽમ્બ તે તનુમિમાં તસ્યાગ્રતો જાગ્રતી ।
લક્ષ્મીઃ સિન્દુરદાનગન્ધલહરીલોલાન્ધપુષ્પન્ધય-
શ્રેણીબન્ધુરશૃઙ્ખલાનિયમિતેવાપૈતિ નૈવ ક્વચિત્ ॥ ૨૮॥

યસ્ત્વાં વિદ્રુમપલ્લવદ્રવમયીં લેખામિવાલોહિતા-
માત્માનં પરિતઃ સ્ફુરત્ત્રિવલયાં માયામભિધ્યાયતિ ।
તસ્મૈ નિન્દિતવન્દનેન્દુકદલીકાન્તારહારસ્રજો
નિઃશ્વાસભ્રમબાષ્પદાહગહના મૂર્છન્તિ તાસ્તાઃ સ્ત્રિયઃ ॥ ૨૯॥

માતઃ શ્રીભગમાલિનીત્યભિધયા દિવ્યાગમોત્તંસિતાં
ત્વામાનન્દમયીમનુસ્મરતિ યસ્તં નામ વામભ્રુવઃ ।
બાહુસ્વસ્તિકપીડિતૈઃ સ્તનતટૈર્દૈન્યાઞ્ચિતૈશ્ચાટુભિ-
ર્નીરન્ધ્રૈઃ પુલકાઙ્કિતૈર્મુકુલિતૈર્ધ્યાયન્તિ નેત્રાઞ્ચલૈઃ ॥ ૩૦॥

યસ્ત્વાં ધ્યાયતિ રાગસાગરતરત્સિન્દૂરનૌકાન્તર-
સ્વૈરોજ્જાગરપદ્મરાગનલિનીપુષ્પાસનાધ્યાસિનીમ્ ।
બાલાદિત્યસપત્નરત્નરચિતપ્રત્યઙ્ગભૂષારુચિ-
શ્રેણીસમ્મિલિતાઙ્ગરાગવસનાસ્તસ્ય સ્મરન્ત્યઙ્ગનાઃ ॥ ૩૧॥

કર્પૂરં કુમુદાકરં કમલિનીપત્રં કલાકૌશલં
કૂજત્કોકિલકામિનીકુલકુહૂકલ્લોલકોલાહલમ્ ।
શઙ્કન્તે પ્રલયાનલં સ્મરમહાપસ્મારવેગાતુરાઃ
કમ્પન્તે નિપતન્તિ હન્ત ન ગિરં મુઞ્ચન્તિ શોચન્તિ ચ ॥ ૩૨॥

શ્રીમૃત્યુઞ્જયનામધેયભગવચ્ચૈતન્યચન્દ્રાત્મિકે
હ્રીઙ્કારિ પ્રથમાતમાંસિ દલય ત્વં હંસસઞ્જીવિનિ ।
જીવં પ્રાણવિજૃમ્ભમાણહૃદયગ્રન્થિસ્થિતં મે કુરુ

ત્વાં સેવે નિજબોધલાભરભસા સ્વાહાભુજામીશ્વરીમ્ ॥ ૩૩॥

એવં ત્વામમૃતેશ્વરીમનુદિનં રાકાનિશાકામુકસ્યાન્તઃ
સન્તતભાસમાનવપુષં સાક્ષાદ્ભજન્તે તુ યે ।
તે મૃત્યોઃ કવલીકૃતત્રિભુવના ભોગસ્ય મૌલૌ પદં
દત્વા ભોગમહોદધૌ નિરવધિ ક્રીડન્તિ તૈસ્તૈઃ સુખૈઃ ॥ ૩૪॥

જાગ્રદ્બોધસુધામયૂખનિચયૈરાપ્લાવ્ય સર્વા દિશો
યસ્યાઃ કાપિ કલા કલઙ્કરહિતા ષટ્ચક્રમાક્રામતિ ।
દૈન્યધ્વાન્તવિદારણૈકચતુરા વાચં પરાં તન્વતી
સા નિત્યા ભુવનેશ્વરી વિહરતાં હંસીવ મન્માનસે ॥ ૩૫॥

ત્વં માતાપિતરૌ ત્વમેવ સુહૃદસ્ત્વ ભ્રાતરસ્ત્વં સખા
ત્વં વિદ્યા ત્વમુદારકીર્તિચરિતં ત્વં ભાગ્યમત્યદ્ભુતમ્ ।
કિં ભૂયઃ સકલં ત્વમીહિતમિતિ જ્ઞાત્વા કૃપાકોમલે
શ્રીવિશ્વેશ્વરિ સમ્પ્રસીદ શરણં માતઃ પરં નાસ્તિ મે ॥ ૩૬॥

શ્રીસિદ્ધનાથ ઇતિ કોઽપિ યુગે ચતુર્થે
પ્રાદુર્બભૂવ કરુણાવરુણાલયોઽસ્મિન્ ।
શ્રીશમ્ભુરિત્યભિધયા સ મયિ પ્રસન્નં
ચેતશ્ચકાર સકલાગમચક્રવર્તી ॥ ૩૭॥

તસ્યાજ્ઞયા પરિણતાન્વયસિદ્ધ્વવિદ્યા-
ભેદાસ્પદૈઃ સ્તુતિપદૈર્વચસાં વિલાસૈઃ ।
તસ્માદનેન ભુવનેશ્વરિ વેદગર્ભં
સદ્યઃ પ્રસીદ વદને મમ સન્નિધેહિ ॥ ૩૮॥

યેષાં પરં ન કુલદૈવતમમ્બિકે ત્વં
તેષાં ગિરા મમ ગિરો ન ભવન્તુ મિશ્રાઃ ।
તૈસ્તુ ક્ષણં પરિચિતે વિષયેઽપિ વાસો
મા ભૂત્કદાચિદિતિ સન્તતમર્થયે ત્વામ્ ॥ ૩૯॥

શ્રીશમ્ભુનાથ કરુણાકર સિદ્ધનાથ
શ્રીસિદ્ધનાથ કરુણાકર શમ્ભુનાથ ।
સર્વાપરાધમલિનેઽપિ મયિ પ્રસન્નં
ચેતઃ કુરુષ્વ શરણં મમ નાન્યદસ્તિ ॥ ૪૦॥

ઇત્થં પ્રતિક્ષણમુદશ્રુવિલોચનસ્ય
પૃથ્વીધરસ્ય પુરતઃ સ્ફુટમાવિરાસીત્ ।
દત્વા વરં ભગવતી હૃદયં પ્રવિષ્ટા
શાસ્ત્રૈઃ સ્વયં નવનવૈશ્ચ મુખેઽવતીર્ણા ॥ ૪૧॥

વાક્સિદ્ધિમેવમતુલામવલોક્ય નાથઃ
શ્રીશમ્ભુરસ્ય મહતીમપિ તાં પ્રતિષ્ઠામ્ ।
સ્વસ્મિન્પદે ત્રિભુવનાગમવન્દ્યવિદ્યા-
સિંહાસનૈકરુચિરે સુચિરં ચકાર ॥ ૪૨॥

ભૂમૌ શય્યા વચસિ નિયમઃ કામિનીભ્યો નિવૃત્તિઃ
પ્રાતર્જાતીવિટપસમિધા દન્તજિહ્વાવિશુદ્ધિઃ ।
પત્રાવલ્યાં મધુરમશનં બ્રહ્મવૃક્ષસ્ય પુષ્પૈઃ
પૂજાહોમૌ કુસુમવસનાલેપનાન્યુજ્જ્વલાનિ ॥ ૪૩॥

ઇત્થં માસત્રયમવિકલં યો વ્રતસ્થઃ પ્રભાતે
મધ્યાહ્ને વાઽસ્તમિતસમયે કીર્તયેદેકચિત્તઃ ।
તસ્યોલ્લાસૈઃ સકલભુવનાશ્ચર્યભૂતૈઃ પ્રભૂતૈર્વિદ્યાઃ
સર્વાઃ સપદિ વદને શમ્ભુનાથપ્રસાદાત્ ॥ ૪૪॥

વ્રતેન હીનોઽપ્યનવાપ્તમન્ત્રઃ શ્રદ્ધાવિશુદ્ધોઽનુદિનં જપેદ્યઃ ।
તસ્યાપિ વર્ષાદનવદ્યસદ્યઃ કવિત્વહૃદ્યાઃ પ્રભવન્તિ વિદ્યાઃ ॥ ૪૫॥

કોઽપ્યચિન્ત્યપ્રભાવોઽસ્ય સ્તોત્રસ્ય પ્રત્યયાવહઃ ।
શ્રીશમ્ભોરાજ્ઞયા સર્વાઃ સિદ્ધયોઽસ્મિન્પ્રતિષ્ઠિતાઃ ॥ ૪૬॥

ઇતિ શ્રી સકલાગમાચાર્યચક્રવર્તિશ્રીપૃથ્વીધરાચાર્ય વિરચિતં
વેદગર્ભં શ્રીભુવનેશ્વરીસ્તોત્રં અથવા
શ્રીભુવનેશ્વરીમહાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Vedagarbham Shri Bhuvaneshvari Stotram or Shri Bhuvaneshvari MahastotraM*

pdf was typeset on May 8, 2021

Please send corrections to *sanskrit@cheerful.com*